दशमः पाठः

# दशमः कः ?


अयि भोः! गतसप्ताहे संस्कृत-ओलम्पियाड्-परीक्षा अभवत्। तत्र के भागं गृहीतवन्तः ?
महोदय ! वयं सर्वे भागं गृहीतवन्तः।
तत्र कः प्रथमं स्थानं प्राप्तवान् ?
महोदय ! विद्याधरः प्रथमं स्थानं प्राप्तवान्।
अभिनन्दनम्। अभिनन्दनम्। तर्हि द्वितीयः कः ?
महोदय ! सा प्रीतिः।
अरे ! बहु सुन्दरम्। तस्याः अपि अभिनन्दनम्। तर्हि तृतीये स्थाने कः का वा अस्ति ?
महोदय ! तृतीयं स्थानं हेमलता प्राप्तवती।


अस्तु तस्याः अपि अभिनन्दनम्।
अन्ये केऽपि किमपि स्थानं प्राप्तवन्तः किम्?
महोदय! अहं पञ्चमी अस्मि।
महोदय! अहं चतुर्थः अस्मि।
महोदय! अहं नवमी अस्मि।
अहो उत्तमम्। भवद्भ्यः सर्वेभ्यः आशीर्वादाः। तर्हि दशमः कोऽस्ति भोः?
दशमस्य विषये वयं न जानीमः श्रीमन्!
चिन्ता मास्तु, वयम् अद्य दशमस्य विषये एकां कथां पठामः।



एकदा दश बालकाः स्नानाय नदीम् अगच्छन्। ते नदीजले चिरं स्नानम् अकुर्वन्। ततः ते तीर्त्वा पारं गताः। तदा तेषां नायकः अपृच्छत् – अपि सर्वे बालकाः नदीम् उत्तीर्णाः ? तदा कश्चित् बालकः सर्वान् पङ्क्तौ स्थापयित्वा अगणयत् – एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव इति। सः आत्मानं न अगणयत्। अतः सः अवदत् - अरे वयं नव एव स्मः भोः ! दशमः नास्ति। अपरः अपि बालकः पुनः आत्मानं त्यक्त्वा अन्यान् बालकान् अगणयत्। तदा अपि नव एव आसन्। अतः ते निश्चयम् अकुर्वन् यत् दशमः नद्यां मग्नः। ते विषण्णाः तूष्णीम् अतिष्ठन्।

तदा कश्चित् पथिकः तत्र आगच्छत्। सः तान् बालकान् दुःखितान् दृष्ट्वा अपृच्छत् – अयि बालकाः ! युष्माकं दुःखस्य कारणं किम्? बालकानां नायकः अकथयत् "वयं दश बालकाः स्नातुम् आगताः। इदानीं नव एव स्मः। एकः नद्यां मग्नः" इति।

पथिकः तान् अगणयत्। तत्र दश बालकाः तु आसन्। सः नायकम् आदिशत् त्वं बालकान् गणय। सः नव बालकान् एव अगणयत्। तदा पथिकः अवदत् – दशमः त्वम् असि इति। तत् श्रुत्वा सर्वे प्रहृष्टाः भूत्वा अकथयन् – दशमः प्राप्तः दशमः प्राप्तः इति। ततः सर्वे मिलित्वा आनन्देन गृहम् अगच्छन्।



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| तीर्त्वा | सन्तरणं कृत्वा | तैरकर | Having Swum | |
| स्नानाय | स्नाननिमित्तम् | नहाने के लिए | For bathing | |
| चिरम् | बहुकालपर्यन्तम् | देर तक | For a long time | |
| उत्तीर्णाः | पारं गताः | पार हुए | Crossed over | |
| अपरः | अन्यः | दूसरा | Another | |
| स्वम् | आत्मानम् | स्वयं को | Oneself | |
| मग्नः | विलीनः | डूब गया | Drowned | |
| विषण्णाः | खिन्नाः | दुःखी हुए | Saddened | |
| तूष्णीम् | निःशब्दम् | मौन | Silent | |
| पथिकः | मार्गगन्ता | यात्री | Traveller | |
| अगणयत् | गणनां कृतवान् | गिना | Counted | |
| प्रहृष्टाः | आनन्दिताः | प्रसन्न | Delighted | |
| कतमः | कियत्-संख्यात्मकः | कौन-सा | Which one | |

### अत्र इदम् अवधेयम्

संख्यावाचक-शब्दानां पूरणार्थे '**प्रथमः**', '**द्वितीयः**', '**तृतीयः**' इत्यादिशब्दाः भवन्ति।

यथा – एकम् → पूरणार्थे = **प्रथमः** / **प्रथमा** / **प्रथमम्**।

द्वे → पूरणार्थे = **द्वितीयः** / **द्वितीया** / **द्वितीयम्**।

त्रीणि → पूरणार्थे = **तृतीयः** / **तृतीया** / **तृतीयम्** इत्यादयः।

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

**१. कोष्ठकात् समीचीनम् उत्तरं चित्वा लिखन्तु—**

(क) कति बालकाः स्नातुं गताः ? (पञ्च, द्वादश, दश)

(ख) कतमः बालकः नद्यां मग्नः इति निश्चयम् अकुर्वन् ? (प्रथमः, दशमः, पञ्चमः)

(ग) दशमः कः आसीत्? (नायकः, पथिकः, नदी)

(घ) कः सम्यक् रूपेण बालकान् गणितवान्? (नायकः, पथिकः, बालकः)

(ङ) बालकाः कां तीर्त्वा पारं गताः? (पुष्करिणीम्, समुद्रम्, नदीम्)

**२. पाठस्य आधारेण एकवाक्येन प्रश्नानाम् उत्तराणि लिखन्तु—**

(क) दश बालकाः किमर्थं नदीम् अगच्छन्?

(ख) नायकः किम् अपृच्छत्?

(ग) बालकाः स्नानाय कुत्र अगच्छन्?

(घ) बालकाः किं निश्चयम् अकुर्वन्?

(ङ) बालकाः कथं गृहम् अगच्छन्?

**३. पट्टिकातः उचितं विशेषणपदं योजयित्वा वाक्यानि रचयन्तु—**

**अङ्गुलयः**




| प्रथमा | द्वितीया | तृतीया | चतुर्थी | पञ्चमी |
|---|---|---|---|---|

(क) करे ........................................ अङ्गुलिः भवति तर्जनी।

(ख) अनामिका ........................................ अङ्गुलिः भवति।

(ग) करे ........................................ अङ्गुलिः भवति अङ्गुष्ठः।

(घ) कनिष्ठिका ........................................ अङ्गुलिः भवति।

(ङ) करे ........................................ अङ्गुलिः भवति मध्यमा।



© NCERT not to be republished

## ४. पट्टिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु —



**सप्ताहः**

प्रथमः दिवसः – रविवासरः
द्वितीयः दिवसः – सोमवासरः
तृतीयः दिवसः – मङ्गलवासरः
चतुर्थः दिवसः – बुधवासरः
पञ्चमः दिवसः – गुरुवासरः
षष्ठः दिवसः – शुक्रवासरः
सप्तमः दिवसः – शनिवासरः

(क) सप्ताहस्य प्रथमः दिवसः कः ? ............................................

(ख) सप्ताहस्य कतमः दिवसः रविवासरः अस्ति ? ............................................

(ग) सप्ताहस्य षष्ठः दिवसः कः ? ............................................

(घ) सप्ताहस्य कतमः दिवसः शनिवासरः अस्ति ? ............................................

(ङ) सप्ताहस्य अन्तिमः दिवसः कः अस्ति ? ............................................

## ५. वाटिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु —

**भारतीय-द्वादशमासाः**




(क) मासेषु पञ्चमः मासः कः ? ............................................

(ख) मार्गशीर्षः कतमः मासः अस्ति ? ............................................

(ग) मासेषु दशमः मासः कः ? ............................................


© NCERT not to be republished

(घ) कार्त्तिकः कतमः मासः अस्ति? ..............................................

(ङ) मासेषु अन्तिमः मासः कः? ..............................................

**६. मञ्जूषां पश्यन्तु, उत्तरं लिखन्तु —**

आङ्ग्लमासाः




(क) आङ्ग्लमासेषु दशमः मासः ..............................................

(ख) फरवरीमासः .............................................. मासः अस्ति।

(ग) आङ्ग्लमासेषु अष्टमः मासः ..............................................

(घ) सितम्बरमासः .............................................. मासः अस्ति।

(ङ) आङ्ग्लमासेषु अन्तिमः मासः ..............................................

**७. अधोलिखिते गद्यांशे अङ्कानां स्थाने संख्यावाचकशब्दान् लिखन्तु —**

यथा – (१) पाठशाला – एका पाठशाला

.............................................. (१) पाठशाला अस्ति। तत्र .............................................. (३) अध्यापकाः सन्ति। साहित्यकक्षायां .............................................. (२०) छात्राः सन्ति। एकस्मिन् दिने .............................................. (१) निरीक्षकः आगतवान्। तस्मिन् दिने साहित्यकक्षायां .............................................. (१५) छात्राः उपस्थिताः। .............................................. (५) अनुपस्थिताः। निरीक्षकः .............................................. (१०) शब्दान् लेखितुम् उक्तवान्। .............................................. (२) छात्रौ .............................................. (७) शब्दान् सम्यक् लिखितवन्तौ। .............................................. (१) छात्रः सर्वान् अपि .............................................. (१०) शब्दान् सम्यक् लिखितवान्। अवशिष्टाः .............................................. (१२) छात्राः .............................................. (९) शब्दान् सम्यक् लिखितवन्तः।

© NCERT not to be republished



## योग्यताविस्तरः

**१. संख्येयशब्दाः**

| संख्या | | पूरणशब्दाः | | | | | |
|---|---|---|---|---|---|---|---|
| | | पुं. | | स्त्री. | | नपुं. | |
| एकम् | १ | प्रथमः | १$^{\text{मः}}$ | प्रथमा | १$^{\text{मा}}$ | प्रथमम् | १$^{\text{मम्}}$ |
| द्वे | २ | द्वितीयः | २$^{\text{यः}}$ | द्वितीया | २$^{\text{या}}$ | द्वितीयम् | २$^{\text{यम्}}$ |
| त्रीणि | ३ | तृतीयः | ३$^{\text{यः}}$ | तृतीया | ३$^{\text{या}}$ | तृतीयम् | ३$^{\text{यम्}}$ |
| चत्वारि | ४ | चतुर्थः | ४$^{\text{थः}}$ | चतुर्थी | ४$^{\text{थी}}$ | चतुर्थम् | ४$^{\text{र्थम्}}$ |
| पञ्च | ५ | पञ्चमः | ५$^{\text{मः}}$ | पञ्चमी | ५$^{\text{मी}}$ | पञ्चमम् | ५$^{\text{मम्}}$ |
| षट् | ६ | षष्ठः | ६$^{\text{ठः}}$ | षष्ठी | ६$^{\text{ठी}}$ | षष्ठम् | ६$^{\text{ष्ठम्}}$ |
| सप्त | ७ | सप्तमः | ७$^{\text{मः}}$ | सप्तमी | ७$^{\text{मी}}$ | सप्तमम् | ७$^{\text{मम्}}$ |
| अष्ट | ८ | अष्टमः | ८$^{\text{मः}}$ | अष्टमी | ८$^{\text{मी}}$ | अष्टमम् | ८$^{\text{मम्}}$ |
| नव | ९ | नवमः | ९$^{\text{मः}}$ | नवमी | ९$^{\text{मी}}$ | नवमम् | ९$^{\text{मम्}}$ |
| दश | १० | दशमः | १०$^{\text{मः}}$ | दशमी | १०$^{\text{मी}}$ | दशमम् | १०$^{\text{मम्}}$ |
| | | | | | | | |
| एकादश | ११ | एकादशः | ११$^{\text{शः}}$ | एकादशी | ११$^{\text{शी}}$ | एकादशम् | ११$^{\text{शम्}}$ |
| द्वादश | १२ | द्वादशः | १२$^{\text{शः}}$ | द्वादशी | १२$^{\text{शी}}$ | द्वादशम् | १२$^{\text{शम्}}$ |
| त्रयोदश | १३ | त्रयोदशः | १३$^{\text{शः}}$ | त्रयोदशी | १३$^{\text{शी}}$ | त्रयोदशम् | १३$^{\text{शम्}}$ |
| चतुर्दश | १४ | चतुर्दशः | १४$^{\text{शः}}$ | चतुर्दशी | १४$^{\text{शी}}$ | चतुर्दशम् | १४$^{\text{शम्}}$ |
| पञ्चदश | १५ | पञ्चदशः | १५$^{\text{शः}}$ | पञ्चदशी | १५$^{\text{शी}}$ | पञ्चदशम् | १५$^{\text{शम्}}$ |
| षोडश | १६ | षोडशः | १६$^{\text{शः}}$ | षोडशी | १६$^{\text{शी}}$ | षोडशम् | १६$^{\text{शम्}}$ |
| सप्तदश | १७ | सप्तदशः | १७$^{\text{शः}}$ | सप्तदशी | १७$^{\text{शी}}$ | सप्तदशम् | १७$^{\text{शम्}}$ |
| अष्टादश | १८ | अष्टादशः | १८$^{\text{शः}}$ | अष्टादशी | १८$^{\text{शी}}$ | अष्टादशम् | १८$^{\text{शम्}}$ |
| नवदश | १९ | नवदशः | १९$^{\text{शः}}$ | नवदशी | १९$^{\text{शी}}$ | नवदशम् | १९$^{\text{शम्}}$ |
| विंशतिः | २० | विंशः | २०$^{\text{शः}}$ | विंशी | २०$^{\text{शी}}$ | विंशम् | २०$^{\text{शम्}}$ |

© NCERT not to be republished

## २. संख्या (एकतः शतपर्यन्तम्)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | एकम् | ११ | एकादश | २१ | एकविंशतिः | ३१ | एकत्रिंशत् | ४१ | एकचत्वारिंशत् |
| २ | द्वे | १२ | द्वादश | २२ | द्वाविंशतिः | ३२ | द्वात्रिंशत् | ४२ | द्विचत्वारिंशत् |
| ३ | त्रीणि | १३ | त्रयोदश | २३ | त्रयोविंशतिः | ३३ | त्रयस्त्रिंशत् | ४३ | त्रिचत्वारिंशत् |
| ४ | चत्वारि | १४ | चतुर्दश | २४ | चतुर्विंशतिः | ३४ | चतुस्त्रिंशत् | ४४ | चतुश्चत्वारिंशत् |
| ५ | पञ्च | १५ | पञ्चदश | २५ | पञ्चविंशतिः | ३५ | पञ्चत्रिंशत् | ४५ | पञ्चचत्वारिंशत् |
| ६ | षट् | १६ | षोडश | २६ | षड्विंशतिः | ३६ | षड्त्रिंशत् | ४६ | षड्चत्वारिंशत् |
| ७ | सप्त | १७ | सप्तदश | २७ | सप्तविंशतिः | ३७ | सप्तत्रिंशत् | ४७ | सप्तचत्वारिंशत् |
| ८ | अष्ट | १८ | अष्टादश | २८ | अष्टाविंशतिः | ३८ | अष्टत्रिंशत् | ४८ | अष्टचत्वारिंशत् |
| ९ | नव | १९ | नवदश | २९ | नवविंशतिः | ३९ | नवत्रिंशत् | ४९ | नवचत्वारिंशत् |
| १० | दश | २० | विंशतिः | ३० | त्रिंशत् | ४० | चत्वारिंशत् | ५० | पञ्चाशत् |
| ५१ | एकपञ्चाशत् | ६१ | एकषष्टिः | ७१ | एकसप्ततिः | ८१ | एकाशीतिः | ९१ | एकनवतिः |
| ५२ | द्विपञ्चाशत् | ६२ | द्विषष्टिः | ७२ | द्विसप्ततिः | ८२ | द्व्यशीतिः | ९२ | द्विनवतिः |
| ५३ | त्रिपञ्चाशत् | ६३ | त्रिषष्टिः | ७३ | त्रिसप्ततिः | ८३ | त्र्यशीतिः | ९३ | त्रिनवतिः |
| ५४ | चतुःपञ्चाशत् | ६४ | चतुष्षष्टिः | ७४ | चतुस्सप्ततिः | ८४ | चतुरशीतिः | ९४ | चतुर्णवतिः |
| ५५ | पञ्चपञ्चाशत् | ६५ | पञ्चषष्टिः | ७५ | पञ्चसप्ततिः | ८५ | पञ्चाशीतिः | ९५ | पञ्चनवतिः |
| ५६ | षट्पञ्चाशत् | ६६ | षट्षष्टिः | ७६ | षट्सप्ततिः | ८६ | षडशीतिः | ९६ | षण्णवतिः |
| ५७ | सप्तपञ्चाशत् | ६७ | सप्तषष्टिः | ७७ | सप्तसप्ततिः | ८७ | सप्ताशीतिः | ९७ | सप्तनवतिः |
| ५८ | अष्टपञ्चाशत् | ६८ | अष्टषष्टिः | ७८ | अष्टसप्ततिः | ८८ | अष्टाशीतिः | ९८ | अष्टनवतिः |
| ५९ | नवपञ्चाशत् | ६९ | नवषष्टिः | ७९ | नवसप्ततिः | ८९ | नवाशीतिः | ९९ | नवनवतिः |
| ६० | षष्टिः | ७० | सप्ततिः | ८० | अशीतिः | ९० | नवतिः | १०० | शतम् |

© NCERT not to be republished

३. **संकटनाशनं श्रीगणेशस्तोत्रं पठन्तु गायन्तु च।**

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्॥
भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये॥१॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्॥
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्॥२॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च॥
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम्॥३॥

नवमं भालचन्द्रं च दशमं तु विनायकम्।
एकादशं गणपतिं द्वादशं तु गजाननम्॥४॥





## परियोजनाकार्यम्

१. **पाठ्यपुस्तकस्य पाठानुक्रमणिकां दृष्ट्वा प्रथमपाठतः दशमपाठपर्यन्तं पूरणप्रत्ययान्तशब्दैः क्रमशः पाठानां नामानि लिखन्तु।**

२. **सारिण्यां विद्यमानानां संख्यापदानाम् अभ्यासं कुर्वन्तु।**

| संख्या | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| १ | एकः | एका | एकम् |
| २ | द्वौ | द्वे | द्वे |
| ३ | त्रयः | तिस्रः | त्रीणि |
| ४ | चत्वारः | चतस्रः | चत्वारि |
| ५ | पञ्च | पञ्च | पञ्च |

**पञ्चतः आरभ्य संख्याशब्दानां त्रिषु लिङ्गेषु समानरूपाणि भवन्ति।**

© NCERT not to be republished